# राष्ट्रं धारयतां ध्रुवम्

षड्सप्ततितमः गणराज्योत्सवः




देहलीस्थेन केन्द्रीयसंस्कृतविश्वविद्यालयेन यथापूर्वम् अस्मिन्नपि वर्षे गणराज्योत्सवः सवैभवं समाचरितः। ध्वजवन्दनं विधाय भाषमाणाः कुलपतयः श्रीनिवासवरखेडीवर्याः अवोचन् यत् - राष्ट्रयज्ञे सर्वाः अपि प्रजाः आहुतिं/हविः दद्युः। विकासरूपिणी तारुण्यदशा लब्धा वर्तते। तरुणे राष्ट्रे आचारसंहिता भवेत् एव।

किञ्च सुखस्य मूलं धर्मः धर्मस्य मूलम् अर्थः अर्थस्य मूलं राज्यं राज्यस्य मूलम् इन्द्रियविजयः इति कौटिल्येन उक्तमेव। अस्माभिः विवेकः विद्या विनयश्चेति त्रयाणां गुणानां बलेन इन्द्रियविजयः सम्पादनीयः। तेन आत्मबलम् अभिवर्धते। आत्मबलेन विना विकासः अशक्य एव। राष्ट्रचेतनायाः जागरणमेव अस्माकं चरमं लक्ष्यम् अस्ति। वयं तद्दिशि अभिमुखाः भवेम ।



अधिकारः स्वातन्त्र्यम् इति तत्त्वद्वयम् लोकतन्त्रात्मके राष्ट्रे महत्त्वपूर्णं वर्तते। अधिकारशब्दस्य कर्तव्यम् इति अर्थः स्वीकर्तव्यः न तु स्वार्थः ।

स्वातन्त्र्यम् इति शब्दस्य स्वेच्छाचारः इति अर्थः नैव अपि तु काचित् मर्यादा इति विज्ञाय वर्तितव्यम्। द्वयोः वास्तविकः अर्थः सम्यक् ज्ञेयः। छात्रनिर्माणे मम मर्यादा का स्यात् इति शिक्षकेणापि आत्मशोधः कर्तव्यः। अनेन लक्ष्योन्मुखाः भवितुं शक्नुमः। आत्मविजयेन विना उन्नतिं

विकासं वा सम्पादयितुं नैव शक्यते। विकासयात्रायां राष्ट्रनिर्माणे च सर्वस्यापि व्यक्तिगतं योगदानं भवतु इति भावयामि ।



ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥

इति मन्त्रः अस्माकम् अभिप्रेरकः। गणराज्योत्सवस्य शुभावसरे शुभाशयाः सन्तु। सर्वेषां मङ्गलानि च भवन्तु।

स्थानम्-सारस्वत सभागारः
केन्द्रीयसंस्कृतविश्वविद्यालयः

वार्ताहरः
श्रीविनयकुमारशुक्लः